श्रके तं शवि मुखतां वक्ष्मोत्स्वनाचं प्राप्ति नं श्रनापी ॥ तनोतिशलो ॥ नित्नरामुदारो दिवाकरो द्वास्थितं शके चेत ॥
५ ॥ नूतं नः स्वदेश पुरुषो विशेषाद् भौद्वागः शौर्य युतो नितांतं ॥ विदेशवासं प्रमहत्व्रतिष्ठां मानंरमैव पग
तेप्रसक्तो ॥ ६ वदान्यतां सत्पुरगाव जेनक्षपरापादिनत्वादि परीतरुष्ठा ॥ सन्मानतां प्रासहितो हि मन्यो दिवा
करो भं यदि पाणिसंस्थं ॥ ७ ॥ भूपालतुल्यः स्वकुले सुशीलो बालो विशालोत्तमकीर्तिशाली शास्त्रे प्रवीणः प ६४ ॥

रिस्तिकालेवक्षस्थलेचेन्नलिनीशुभंस्यात् ॥८॥ समासमेतोरगाकर्मभीरुः कलाकलापाकलनैकशीलः ॥ धर्म
प्रवृत्तिः सुतराम्पुरारोनाभीसरोजेंबुजबंधुताराः ॥९॥ कदर्पदर्पोर्जितसाधुकर्मा सदीनदृष्ट्याभिरुचिः कलाज्ञः ॥ चे
ज्जन्मकालेनलिनी शुभंस्यात् सुषस्थले सोतुलकीर्तियुक्तः ॥१०॥ नानादेशानेकधासंप्रचारः कार्पण्यसाहं चचल
स्नामगात्रः धूर्तोमर्त्यः स्वल्पतोनम्र[illegible]जातुस्थानेभानुसंजन्मनिस्यात् ॥११॥ कृषिक्रियालोलनिर
तोल्पधर्मः समोर्जितः सेवनकर्मकर्त्ता ॥ ताराघदिस्यादरविंदबंधोः पादाग्र[illegible]देनसदै[illegible]जीवी ॥१२॥
इति दृग्भचक्रफलं ॥ इति श्रीमद्दैवज्ञवर्यपंडितरामोदयात्मजबलभद्रविरचिते होराक्नत्रे जन्मदुष्टकालसंव
त्सरादिकालाध्यायो द्वितीयः ॥२॥ अथस्पष्टग्रहाणांलग्नादिभावावस्थितिज्ञानंविना देशकर्तुमशक्य
त्वात्पूर्वापरनतोन्नतसहितालग्नाद्योद्वादशभावाःससंधयोभावकुंडलकरोहि अवरोहेफलभाव
विंशोपकलसहितालेख्याः ॥ उक्तंचसर्वसिद्धांते ॥ यात्राविवाहचौलान्नप्राशनेजन्मनिव्रते ॥ नृपाभि
षेककर्त्तव्याभावद्वादशसाधकेइति ॥ अथभावगताग्रहाः ॥ केवलंभानफलार्थमेवज्ञेयानान्यविचा
रेकृपतोवक्ष्यमाणांदृष्टिगणितमैत्रीचक्रादिकंबलोपयुक्तंचस्थानगतग्रहैरेवक्रियते ॥ नभावगतैर्ग्र

होरारत्नं॰ हेनैव त्रिपतेन भावगतैर्ग्रहैः॥ उक्तं च स्तुधानिधौ॥ जन्मादष्टच्छादिशुभाशुभेषु भावाविशेषाः सुधिया यतोत्र
॥६५॥ तत्तद्दृशैनैव दिशंति नित्यं शुभाशुभं तां भावप्रवेन मोगाः॥ श्रीपतिनानु जन्मादेव स्पष्टाख्ययोगादि फलं
भावेनैवमवतीत्युक्तं॥ जन्मप्रयाणव्रतबंधचोलनृपाभिषेकादिकरग्रहेषु॥ पूर्वं हि भावाः परिकल्पनीयास्ते
नैव योगोत्थफलानि यस्मात्॥ अत्रापि तेनैव भावोत्थफलानि यस्मादिति केनपठंति॥ गन्यद्वत्तेनैवो
क्तं॥ भावांशतुल्यः खलु वर्तमानं भावोद्भवं प्रतीतफलं विधत्ते॥ भावोनकेवाप्यधिके चरवेटैस्त्रैराशिकेन
फलमस्य कल्प्यं॥ भावप्रवृत्तौ हि फलप्रवृत्तिः पूर्णं फलं भावसमांशकेषु॥ ह्रासः क्रमाद्भवविरामकाले
फलस्य नाशः कथितो मुनीन्द्रैः॥ संधिप्रयोजनमुक्तमन्यत्र॥ आरंभसंधौ खचरो यदि स्यान्नः फलं ददा
त्यादिमभावजातं॥ विरामसंधौ यदि वर्त्तमानो भागाभिभावोत्थफलं ददाति स्यादिः॥ भाव कुंडली
प्रयोजनमुक्तं वामनेन॥ लग्नादिभावा विन्यस्ताः भावचक्रे द्वादशाख्ये॥ उदयेर्ग्रहयोगाद्यै ख्याजयंती
नंगिनो मिति॥ भावप्रशंसा फलमाह॥ भावफलं भारद्वाजः॥ सीमंतेजन्मचोलोपनीतियात्राप्रवेश
ने॥ अभिषेके विवाहे च शस्तं भावफलं विदुरिति॥ अत्र भरद्वाजवाक्येपि भावैर्भावि फलमेवोक्तं ॥६८॥

नतनुयोगफलं ॥ अथग्रहभावफलान्याह ॥ तन्वूपवनःस्मर्तिः स्थितः संजनयेद्दिनेशो नरं सरोगं विकलं मनोर्थैः ॥ प्रनष्ट
तेजोपचयं धात्रुपक्षप्रभाविहीनं परतर्कके च ॥१॥ द्वितीयसंस्थः कुरुतेऽर्थहीनं सूर्यः प्रसिद्धारहितं कृतघ्नं ॥ अज्ञा
विहीनं विगतस्वभावं कुमित्रयुक्तं परवंचकं च ॥२॥ सूर्यस्तृतीयः कुरुते मनुष्यं नीरोगदेहं सुनयेन हीनं ॥ परोप
कारप्रगतं प्रसिद्धं विवेकविद्याभ्यधिकं सदैव ॥३॥ चतुर्थगः संजनयेत्कृतघ्नं हृसः सदा शीलविवर्जितांगं स्त्री
निर्जितं पुष्टपवं कुदेहं विवर्जितं सत्यधनेन नित्यं ॥४॥ सुतस्थितं स्वल्पसुतं प्रसूते दिनादिनाथः प्रणायेन हीनं ॥
कुहृत्परत्नं व्यसनाभिभूतं पिताधिकं भूरि विपत्तयुक्तं ॥५॥ विपुस्थितेवासरपप्रसूते हन्तारिपक्षं पुरुषं सुरूपं विनीत
वेषं सुजनैः समेतं प्रियातिथिं बांधवसंमतं च ॥६॥ कलत्रगस्तीक्ष्णकरः प्रसूते कुरूपदेहं कुकलत्रभाजं ॥ कफानिला
भ्यां परिपीडितांगं कामातुरं देहगतं सोहृदं च ॥७॥ करोति सप्तः खरांशुवाष्टमस्थो विदेशरक्तं पुरुषं प्रहीनमन ॥ अपी
डितं तस्मभवैश्चरोगैः जनानुरागोत्तमविवर्जितं च ॥८॥ धर्माश्रितस्तीक्ष्णकरः प्रसिद्धं करोति सम्यं नृपतेरभीष्टम् ॥
परोपचिरेण सदासमेतं निरस्तधर्मं स्मृतिवर्जितं च ॥९॥ कर्माश्रितो वासरपः प्रसूते सुरूपभाजं विनयेः समेतं
प्रभूतमित्रं सुभगं सुकांतं लाभाश्रितस्संजनयेद्दिनेशः प्रभूतलाभं सुभगं निरोगं ॥ सुभोजनाच्छादनवाहनाढ्यं प्रिये

नयाधिकं देवगुरुप्रभक्तं ॥१०॥११

हो०सा०

६६

वदकामविचरणं च ॥११॥ अथ यामित्रं संजनयेद्दिनेशो अथैः समेतं कुजनोद्भवेभ्य श्रपीडितं वैरिभिरेव नित्यं
कुकर्मरक्तं कुजनं नतं प्रवा ॥१२॥ इति सूर्यः ॥ मूर्त्तिस्थितो रात्रिपतिः प्रसूते स्वं दर्शविंवः सुभगं सुकांतं ॥ स्त्रीरागः सं
याड्यं बहुपापयुक्तं विहीनपक्षं गतसौहृदं च ॥१॥ द्वितीयसंस्थः कुरुते शशांको अशान्वितं सर्वसमस्तपृक्तं
प्रियंवदं ग्रासमरादेवभक्तं महाप्रभावं बहुसौहृदं च ॥२॥ ताराधिपः संजनयेत्तृतीयः सुरूपदेहं सुभगं मनोज्ञं ॥
स्त्रीवल्लभं सर्वकलासु दक्षं प्रजाख्यभीष्टं बहुपुत्रपौत्रं ॥३॥ सुखस्थितः संजनयेच्छशांकः प्रमत्तसौख्यं पुरुषं
प्रधानं ॥ स्त्रीणामभीष्टं गुरुदेवभक्तं गतप्रभानं गतवैरशोकं ॥४॥ चंद्रः सुतस्थः सुसुतं प्रसूते विद्याधिकं ब्राह्मणदेव
भक्तं गुरुस्वभावं विजितारिपक्षं प्रियंवदं पार्थिववल्लभं च ॥५॥ षष्ठः शशांकः कुरुतेन्यजीवं रोगाधिकं शत्रुनिपीडितं
गं ॥ कुरूपदेहं क्षुधिपासमेतं सौख्यैर्विहीनं परवंचकं च ॥६॥ कलत्रगः संजनयेच्छशांको धर्मध्वजं भूरिदपास
मेतं प्रसन्नमूर्त्तिं विभवान्वितं च प्रख्यातकीर्त्तिः क्षुधिपासमेतं ॥७॥ चंद्रोष्टमस्थः कुरुतेल्पवीर्यं स्वल्पायु
षं सत्यदयाविहीनं ॥ स्नेहैर्विहीनं परदाररक्तं स्वधारनेवांधववर्जितं च ॥८॥ धर्माश्रितः संजनयेच्छशांकः प्रसन्न
मित्रं प्रचुरान्नपानं ॥ प्रक्षिद्विभक्तं प्रणतारिपक्षं प्रशंसितं साधुजनेन नित्यं ॥९॥ आकाशसंस्थे कुरुते ॥६६॥

नेशशांकोऽत्र पत्नीप्रियं वा धवमानपुष्टं ॥ प्रियातिथिं प्रीतिकरं गुरूणां सदैव भक्तं वरदेवतानां ॥१॥ स्वो
च्चाश्रितः सञ्जनयेद्धि दुग्धं प्रभूतलाभं खलु शीतरश्मिः सुरूपदेहं सुतनानुरक्तं उदारचित्तं हतशत्रुसंघं
॥११॥ व्ययान्वितः शीतकरः प्रसूते व्ययैरनिष्टैः सहितं कृतघ्नं ॥ वैरप्रधानं बहुशत्रुपक्षं स्वस्थायुधं स
त्यविहीनवेषं ॥१२॥ इति चन्द्रः ॥ होराश्रितो भूतनयः प्रसूते रक्तास्यरोगैः परिपीडितांगं ॥ पित्तानिलाभ्या
सोहतं कुरूपं विहीनशक्तिं मतिवर्जितं च ॥१॥ धनस्थितो भूतनयः प्रसूते धनैर्विहीनं जनताविरुद्धं
कठोरवाचीनिनतं कुबुद्धिप्रभाविहीनं गतसौहृदं च ॥२॥ करोति भौमः सहजाश्रितश्च नीरोगदेहं
जयप्रधानं नरेन्द्रमानान्वितमिद्धधर्मं प्रभूतकोशं सततं नसृष्टं ॥३॥ सुखस्थितः सञ्जनयेद्धि वक्रः
सुखैर्विहीनं सततं दुःखमेव ॥ सुबुद्धिहीनं गतबंधुवर्गं व्ययाश्रितं कामपरं नृशंसं ॥४॥ सुतः स्थित
सञ्जनयेद्धि वक्रः सुतैर्विहीनं पुरुषं सदैव ॥ पापैस्समेतं परतर्कवं चविद्याविहीनं गतसौहृदं च ॥५॥ रिपुः स्थि
तः सञ्जनयेद्धरारिः कुलप्रधानं प्रियदर्शनं च ॥ सतश्लाघितं साधुजनेन नित्यं विनीतवेषं सततं सुशीलं ॥६
कलत्रसंस्थः क्षितिजः प्रसूते विदेशभाजं कुकलत्रपुत्रं ॥ विवादशीलं बहुशत्रुपक्षं नीचानुरक्तं प्रियसाह

हो॰ सार॰ ६७॥

संच॥७॥ वृत्तिस्थितः संजनयेत्क्षितीशः शस्त्रान्तदेहं प्रभयाविहीनं॥ कुपार्थियाशा(रा) कसमित्रचेष्टं कृपाविही
नं गतसौहृदं च॥८॥ धर्माश्रितः संजनयेत्कुधर्मं मोक्षं कुरूपं गतवैधुवं॥ पापैर्विहीनं विगताभिमा
नं प्रतप्तदेहं स्मृतिवर्जितं च॥९॥ कर्माश्रितो संजनयेत्कुधर्मं मतनयः असत्कुकर्मरतं कुधियासमेतं
जनापवादैः प्राप्यं कुत्तधनं स्वपक्षमं बांधववर्जितं च॥१०॥ लाभाश्रितः पार्थिवलाभयुक्तं नरं गतस्ते स्थिति
नः सदैव॥ हतारिपक्षं निजवंधुमान्यं प्रशस्तशीलं निशाधिपलाभिमानं॥११॥ व्ययाश्रितं संजनयेच्च भौ
मो व्ययाधिकं क्रूरस्थितप्रकृतं॥ प्रमत्तनपांव्यसनेसमेतं नपाधिकं धर्मविवर्जितं च॥१२॥ इति भौम॥
तनुस्थितः सोमसुतः प्रसूते प्रज्ञाधिकं मानिनमिष्टधर्मं। महाप्रभावं च जिनैर्विहीनं गुणोत्करं पार्थिवसंमतं च॥
१॥ धनस्थितः संजनयेत्कुशांकिः प्रभूतकोशं स्वजनानुरक्तं प्रियंवदं प्राज्ञरादेवमत्तं मनस्विनं कीर्त्तिक
रं सदैव॥२॥ तृतीयगः सोमसुतः प्रसिद्धं नरं प्रसूते प्रणातं विनीतं प्रमत्तमित्रं प्रमदासमीपं मायाप्रपं
चैरहितं निरीतम॥३॥ बुधो विधत्ते बहुबुद्धियुक्तं पातालगः पुष्टशरीरिरागं च॥ कृषिक्रियालाभयुतं विलि
नीतं व्याधिप्रमुक्तं परमर्दनं च॥४॥ स्वल्पात्मजं संजनयेन्मनुष्यं सुतस्थितः सोमसुतोल्पवीर्यं॥ ६७॥

कोनाशमर्त्यं व्ययपापस्य तं स्वधास्तु मिषैः परिवर्जितं च ॥ पातारिपुस्थितो भृगुरिरिपुग्रस्तं नेत्रुष्याविपुक्तो भलाभतनं ॥
प्रियामिषं प्राप्तेरामन्त्रितं नं सरानुरक्तामानिपीडितं च ॥ ६ ॥ कलत्रगः सोमसुतः सुखस्थं नं रं ग्रस्तं तेवृषभोग
भाजं पतिव्रताक्रामम निष्कृहीनं परोपकारं भ्रातृं नं स देव ७ ॥ रंध्रोऽग्नितो रं ध्रष्युतं निनतां तं वुधं ग्रस्तं तेस उम
मनुष्यं ॥ कफानिला मयापरिपीडितां गं कृशविवराकूलघातं मे च ॥ ८ ॥ भाग्यान्वितः सम्पगुरोः समेतं चेद्रा
मजः प्रीतिकरं ग्रस्तने ॥ जितेन्द्रियं साधुजनानुरक्तं कृषिप्रधानं च प्रगल्भमेव ॥ ९ ॥ नभस्तलस्थ कुरुते
शशाविसुरूपदेहसुभगं सुशीलं ॥ सद्धाता छादनवाहनाद्यैः श्रीरामभीदं सुतपान्वितं च ॥ १० ॥ आ
यस्थितः संजनयेत्सुतं पुंधावि वेदा ७ मतीव कान्तं ॥ योगग्रभुतं प्रस्थितां निमानेन पविन्नियाकुल्पवित्र
रां च ॥ ११ ॥ व्यया श्रितो भारती भाजं वु धग्रस्तं तैविषपग्रशान्तं ॥ परामिमृतं निजवंधुवर्गैः कृतं पदेह कु
पिपाकृतं च ॥ १२ ॥ इति बु. फ. ॥ जीवः प्रस्तं तनुगः सुगात्रं सौभाग्यभाग्यं पापचितं दयालुः ॥ प्राप्तोऽहिपुत्रं
हतशत्रुपक्षं सुकीर्तिनं नीरमतीवहृष्टं ॥ १ ॥ कोशाश्रितः स्यात्सुरराजमन्त्री सुविन्नशान्तप्रमृगवशे दक्ष
नाशायपापस्य च शत्रुरोगे परोपजातस्य सद्भूपणास्यं ॥ २ ॥ तृतीयगो देवपतिः मपरज्योमेधान्वितं

होरार.
॥६८

ऽजनयेत्सुविरूपं ॥ कुलप्रधानं प्रमदाजनमान्यं प्रसिद्धमुर्वीतलमण्डनं च ॥ ३ ॥ सौरर्क्षगाश्रितसं जनयेत्सौख्य
दैवेरतं नैकजनप्रतापं भोग्यं ॥ प्रियातिथिं बांधवलोकमान्यं प्रमत्तया नाशनमस्य जने च ॥ ४ ॥ प्रमत्तपुत्रं सुदा
रमैत्रीयुतं ख्यातं संजनयेन्मनुष्यं ॥ प्रख्यातिपुत्रं सुधियासमेतं प्रियंवदं ब्राह्मणसंमतं च ॥ ५ ॥ षष्ठाश्रिते नरि
रिपुप्रभूतं करोति मर्त्यं बहुरोगयुक्तं ॥ विदेशसेवानिरतं कृतघ्नं सदैव सक्तं जनतासमेतं ॥ ६ ॥ सुरूपदारं सुमतिं
सुशीलं कामाश्रितादेवगुरुः प्रसूते ॥ गर्व्यान्वितं वा वृत्तजनेन हीनं सत्वान्वितं देवगुरुं जगत्यां ॥ ७ ॥ मृत्युस्थितो मं
त्री नु बुद्धिविवर्जितं नागं करोति जीवः प्रबलं मनुष्यम् ॥ विद्याविवेकागमदूषितं च प्रभावहीनं परवंचकं च ॥ ८ ॥ ध
र्माश्रितो देवगुरुः प्रसूते सुधार्मिकं सत्यदयासमेतं ॥ नानाधनैः संयुतमिष्टबंधुमतापितैः साधुजनप्रशस्तं
॥ ९ ॥ कामाश्रितो देवगुरुः प्रसूते सुकर्मभाजं जनताप्रधानं ॥ नरेंद्रमानेन युतं समेतं देवद्विजानां निरतं निरीहं ॥
१० ॥ लाभाश्रितो लाभपरं प्रयुक्तं सदैव सक्तं सुरराजमंत्री ॥ प्रभूतपानाशनवित्तशंसासम्पूर्णहर्षं प्रमदाप्रियं च ॥
११ गुरुः प्रसूते व्ययगो मनुष्यं विदेहशीलं परवित्तलुब्धं ॥ ईर्ष्याधिकं पापजनानुरक्तं कुशीलनष्टं परवंचकं च ॥ १२
नानाविधं कामनिपीडितांगं व्यापत्समेतं व्यसनोद्भवैश्च ॥ १२ इतिगुरुः ॥ भृगौ तनुस्थे सुतनुप्रसूते शास्त्रार्थ ॥ ६८ ॥

रत्नं प्रथितप्रभावं॥ प्रियंवदं सर्वकलासु दक्षं तनोति पद्मं विनयान्वितं च॥१॥ द्वितीयगो भार्गव एव धत्ते धनं वि
चित्रं भजनानुरागं॥ सुवर्णमुक्तामणिवस्त्रलाभं विमुक्तरोगं हतपापवेद्मं॥२॥ शुक्रस्तृतीयः प्रगुणानरिप
क्षेन्नरं प्रसक्तं तेन सुसंप्रशान्तं॥ तेजस्विनं भूरि दयासमेतं सुरूपगात्रं विनयान्वितं च॥३॥ सुखस्थितो भा
र्गवनंदनस्ततः सुखानि सर्वाणि करोति नित्यं॥ रोगक्षयं साधुजनेन सख्यं सदानुरक्तं गुरुदेवजं वा॥४॥
करोति शुक्रः खलु पंचमस्थः सुतान्विचित्रान्प्रचुरप्रभावान्॥ वाचोतिमृद्वीं न च सर्वकाले प्रभूत
नयान्प्रचुरप्रभावं॥५॥ षष्ठो भृगुः संजनयेन्नु रूपं प्रज्ञाविहीनं जडताप्रवृत्तं॥ स्वल्पायुषं स्वल्पधिया
समेतं संत्यक्तशौचं निजधर्मसम्प्रवृत्तं॥६॥ कामाश्रितः संजनयेत्प्रसिद्धं शुक्रः सुमूर्तिं सकलप्रभाजं सत्या
धिकं भूरिदयासमेतं प्रशंसितं साधुजनं सदैव॥७॥ शुक्रोऽष्टमस्थः कुरुतेऽल्पसत्त्वं विदेशसक्तं व्यसना
भिभूतं॥ स्वल्पायुषं बंधुजनैर्विमुक्तं सदारिपुक्तं गुरुदेवकृत्यो॥८॥ भाग्यः स्थितः संजनयेन्मनुष्यं भा
ग्यः समेतं विविधं सदैवा॥ प्रभूतलाभं प्रचुराभिमानं प्राप्तिर्द्विजं तं प्रगुणा तारिपक्षमालं॥९॥ शुक्रः प्रस
ते खलकर्मतः स्थः सुकर्मभाजं सुधनं मनुष्यं॥ सुशीलमाद्यं सुसुतं सुकान्तं सदैव सिद्धान्वितमिष्टधर्मे

होरारत्न
६७

१ चापस्थितो देवगुरुः प्रसूते प्रसूतमायुष्यसुदारवेषं ॥ कन्याग्रजं पार्थिवमानयुक्तं बहुप्रसिद्धिं प्रभुता
समेतं ॥११॥ करोति शुक्रो व्ययगो मनुष्यं व्ययाधिकं वीर्यविहीनदेहं ॥ कन्याग्रजं वित्तविहीनपुत्रं विवर्जितं
शीलदयायतिनस्त्रं ॥१२॥ इति शुक्रः ॥ मंदस्तनुस्थः कुरुते सुमंदं नीचाश्रयं पापकृपातुरं तं । रोद्रः कृशां
गानिपीडितो गंधिहीन सत्वं कुमतिः सुदैवा ॥१॥ धनस्थितः सूर्यसुतः प्रसूते धनैर्विहीनं बहु याचु पाजं ॥
नानाप्रकारैर्व्यसनैः समेतं कृशं विवर्णं गतिवर्जितं च । यदि धीप्रवर्त्मसंमर्दकलालुङ्कृतं प्रसन्न वित्तप्रभुता
समेतं सौरिस्तृतीयः कुरुते सुकार्यविनान्वितं रोगविवर्जितं च ॥३॥ चतुर्थगः संजनयेन्मनुष्यं यानैः स्वरः
सौख्यविवर्जितांगं । विदेशवासं स्वपराभिभूतं सुहीन वृत्तिं निजहीनबंधुः ॥४॥ करोति सौरिः खलु पंच
मस्थः कुमित्रभाजं च कुमित्रयुक्तं । विहीनबोधं विगतप्रतापं विवर्जितं सर्वसुखेन नित्यं ॥५॥ सौरी रि
पुस्थे विगतारिपक्षं करोति मर्त्यं नृपतेरभीष्टं । सद्भोजनाछादनयानमेतं स्वधर्मसक्तं सुधियाप्रयुक्तं
॥६॥ कलत्रगः सूर्यसुतो विधत्ते कुदाररक्तं कुधियासमेतं पापानुरक्तं विनयेन हीनं कुसंगतिः शास्त्र
विवर्जितं च ॥७॥ मंदोष्टमस्थो बहुमंदपुत्रं मदप्रसक्तं विगतप्रभावं रक्तप्रकोपेन निपीडितांगं धिया

ईर्ष्याधिकं वित्तधियाविही
विहीनं परतर्ककं च ॥ न्यायधर्माश्रितं संजनयेत्सदार्किः संस्मृत धर्मजनतासमेतं ॥ ईर्ष्याधिकं वित्तधियाविही
नं प्रमत्तको पसुखत्ववर्जितं च ॥ ९ ॥ शनैश्चरः कर्मगतः प्रसूतेसुकर्मभाजं सुकल्पत्रपुत्रं स्थिरस्वभावं सुनयप्रधा
नं नरेंद्रपूज्यं प्रभुनं प्रतापं ॥ १० ॥ शनैश्चरः लाभगतः प्रसूते विचित्रवलामे सहितं निरीहं । शास्त्रातुरत्तो विजितारिप
क्षं नरेंद्रपूज्यं प्रभुनं प्रतापं ॥ ११ ॥ करोति सौरो व्ययगो विकोपश्रमघ्यं पापरतं कुमित्रं । सदैवहीनं परिपी
डितं स्वशीतं साधुजनैः सदैव ॥ १२ ॥ इति शनिः ॥ अथ राहुभावफलं जातकतत्त्वप्रदीपे ॥ लग्ने तमो दु
रुतां गं साधुप्रचारैः सकलैर्विहीनं ॥ १२ ॥ इति शनिः ॥ श्रीर्षैव्याधि कामरसे न पुत्रं करोति वादं द्विज पैसरोगं ॥ १ ॥ धने
धगाभिः स्वभावं नरं खलं सर्वजनानुवंचकं । तीर्थैव्यापी कामरसे न पुत्रं करोति वादं द्विज पैसरोगं ॥ १ ॥ धन
विनाशकरो हि दरिद्रतां खलु तदालभतेमनु
जते रविचंद्रविमर्दनं मुखरतां कलि भावमपोलभेत ॥ धनविनाशकरो हि दरिद्रतां खलु तदा लभते मनु
जोऽटनं ॥ २ ॥ दुश्चिक्यरि पराजयं प्रकुरुते लोके जयं पापराश्चिन्तावाविगमितदा हि लभते सौख्यं विलास
दिकं ॥ ३ ॥ भ्रातृस्थानिधनं परोऽस्थमरसां दारिद्र्यलोकेजयं सर्वसौख्यगयोः पराक्रमयुतं कुर्यात् राहुः सदा ॥ ३ ॥
दिकं ॥ ३ ॥ भ्रातृस्थानि धनं परोऽस्थमरसां दारिद्र्यलोकेजयं सर्वसौख्यं तयोः सुजनितासुतमित्रसुखं नरो न लभते वसरात्र
सुखगतेन किंचिदविमर्दने सुखविनाशनतां मनुजो लभेत सुजनितासुतमित्रसुखं नरो न लभते वसरात्र
नम ॥ ४ ॥ सुहृत्क्रमे पुत्रविनाशनं च विघाल्पतां स्वोदरपीडनं च ॥ महात्रमं चैव विकल्पतां च प्राप्नोति जं
नम ॥ ४ ॥ सुहृत्क्रमे पुत्रविनाशनं च विघाल्पतां स्वोदरपीडनं च

होरार॰

तुःसुतगेचराहौ॥५॥ शत्रुक्षयंमंदसमागमंचपशुप्रपीडांचरिपीडनंच॥ समागमंम्लेछजनैर्महाबलत्वाप्नोतिमं

७० नुःयदिषष्ठगस्तमः॥६॥ जायाविरोधंखलुवाग्रणाशंप्रचंडरूपामयकोपयुक्तो॥ विवादशीलामयपोगयु

क्तोप्नोतिजंतुर्मदगंतमश्चेत्॥७॥ अरिष्टनाशंखलुगुह्यपीडांगमेरपीडांवपणास्यवृद्धिं॥ आप्नोतिजंतुःकि

लद्रव्यलाभंसिंहीसुतंवाखलुमृत्युगेऽर्जंतुः॥८॥ भाग्यात्स्वतामार्गपैविरोधिनीचदारिद्रभावंविविधावयोगु

॥धर्मार्थनाशंकिलधर्मगंतमःसुखात्पतोवैमरणंनरस्य॥९॥ सन्नत्वसौख्यमपोमनुजोलभेन्नृपसमा

गमनंःसकलंपफलंद्यामगोनविचंडनिपूर्धहापितःसुखंनलभेनवृहावनं॥१०॥ लाभेगतंयदिगमःसुला

र्थलाभंसौख्यागतांन्टपगणाविविधश्चमानः॥ वस्त्रादिकांचनचतुष्पदसौख्यभावंप्राप्नोतिकेर्विज

यतामनुजोलसम्य॥११॥ नेत्रेरोगंकिलपादघातंप्रपंचभावंकिलविप्रलाभं॥ दृष्टैतच्चिर्मेच्छसेवनंच

क्रेरोगनिपानंअयगंतमश्चेत्॥१२॥ इतिराहोर्द्वादशभावफलं॥ चमत्कारचिंतामणौ॥ यदालग्न

गःकेतवःशरीरकार्श्यंभवेत्स्वरोगः॥ भयंव्ययतांच॥ कलत्रादिचिंतामहोद्वेगतावायदीरेतिवाधाव्य

पामानतात्॥१॥ धनेकेतुगोयस्यवार्यस्यनाशंकुटुंबाद्विरोधोनृपादेश्चचिंता॥ सुखयोगदःस्यात्स्वैनै ॥७०॥

नीतिभाषी नतोस्तेग्रहे सौम्यगेहे त्रिसेरव्यं ॥२॥ शिखीदुश्चिक्ये शत्रुनाशं चवाद्यं धनेभ्यापि लाभं जयं मित्रतोपि भवे
दुद्धिनाशः सदा बाहुपीडाभयो हृद्गतामस्तनसो हृद्गतेव ॥३॥ चतुर्थेन मातुः सुखं नो कदाचित्सुहृद्दुर्गतोपि पितृतो नाशमे
ति शिखी बंधुहीनं सुखं नैव गेहे चिरं नो तसे सर्वदा व्यग्रता च ॥४॥ यदा पंचमोपस्य केतुश्च जातस्तदा चोदरे वातपि
तादिकष्टं ॥ स्वबुद्धिर्व्ययः संततिः स्वल्पपुत्रा सदा लाभभावे विलंबो भवेच्च ॥५॥ न मच्छाद्ययाष्ठगे शत्रुनाशं ल
भेन्मातुलात्यक्ततो मानभंगं ॥ चतुष्पदात्सुखं सर्वदा स्वल्पमेव निरंतरा द्देहं सदा व्याधिनाशाय ॥६॥ शिखी
सप्तमो मार्गतो हृद्गता च निवृत्तिश्च नाशोऽथवा निसंधेः भवेन्नीचतः सर्वदा लाभकारी कलत्रादिपीडा व्यये
व्यग्रता च ॥७॥ गुदे पीडितो वा रदाद्रोधयरोधं यदाष्टगः अन्यकामुग्मभे च ॥ भवेद्बंधगोराहुपृष्ठाभिधानस्तवरो
गिभिज्ञा तो सुरवार्यस्य लाभं ॥८॥ यदा धर्मगः केतुको धर्मनाशं सुतीर्थे मतिनैव ततो भाग्यालिब्धिः सहोत्थ
व्यपावाहुरोगं विधत्ते तमोहानतो हास्यवृद्धिं करोति ॥९॥ पितुर्नो सुखं कर्मगो यस्य केतुः स्वयं दुर्भगो मातृ
नाशं करोति हृद्गता कहते स्यात् पीडास्तदेव यदा वे राके कन्यकापातदात्मा ॥१०॥ सुभाग्यः सुविद्याधिकोद
ढीनोप सुमित्रः सुनेत्रः सुवस्त्रप्रियश्च ॥ सदा पीडितं संततिर्दुर्भगस्त्रापि तल्लीसलाभगः सर्वदा लाभकारी ॥

७२

११ शिखीक्षुद्ररोग: अग्निनेत्रे च पीडा स्वयं राजतुल्योऽव्ययेवाप्नोति पितुर्नाशनं मातुलेनैव शर्म तज्जापीडिताव
होरारत्न. स्ति गुह्ये स देव ।।१२।। इति तनुभावफलं ।। अथ सावधिभावफलमाह होराज: ।। लग्नगो गोर्धस्तिथिमि
।।७१।। ति वत्सरे पीडनं भ्रद: ।। सप्तमेऽब्दे व्यतीते द्वितीये वर्षे: प्रपद्यते ।। ततो यो गौ नरवनितेवत्सरे द्रव्यलाभ र:
तुर्थग: कलहं कुर्यान्मन्वब्दे दिननायक: ।। नवमेऽब्दे पितुर्मृत्युं कुर्यात्पंचमगो रवि: ।। त्रयोविंशतिमेऽब्दे च
सर्वस्वं पष्ठग: ।। चतुस्त्रिंशत्तमे वर्षे स्त्रीनाशं सप्तगो रवि: ।। अष्टम: स्त्री मृतिं खवेद्ब्दे तीर्थदो नवमो र
वि: ।। एकोनविंशतो वर्षे दशमे क्लेशवियोगद: ।। पुत्रलाभं त्रिनमिते वर्षे कुर्यात्खलाभग: अष्टत्रिंशत्तमे
ऽब्दे च हानिदो द्वादशे न कि: ।। इत्यर्क: ।। लग्नस्थश्चविधूरोगं सप्तविंशतिवत्सरे ।। तस्मिन्नब्दे ३७ कन्योनौ
द्वितीये पीडनं तपा तृतीये पंचमे वर्षे वैधुलाभकृत्तेःशशी ।। चतुर्थग: पुत्रलाभं द्वाविंशे वत्सरे ध्रुव
मनुवर्षे पंचमस्योऽवहीन: पीडनप्रद: ।। षष्ठेऽष्टमिते वर्षे तु गनाशं चन्द्रस्तु कुरुत ।। सप्तमेमातनाशं
च वर्षे मितितिथिप्रुवं ।। अष्टमे दिवसे जप्ये तस्मिन्वाहयनेमत: ।। नवमे तीर्थयात्रां वशाद्दुर्धे निम्न ।।७१।।

शामेत्वामदष्टांद्रोवर्षेरामात्तद्धिसंख्यके॥ एकादशोविंशतिमे राजमानं चतुष्पदे॥ द्वादशो हानिपीडा वत्सरो येव
रेमे चेत्॥ इतीन्दुः॥ पंचमे द्व लग्नगतो भौमो ऽरिष्टं करोति च॥ धनहा द्वादशो वर्षे धनस्पष्टमहीसुतः॥
पंचमः पंचमे वर्षे वं धु
त्रयोदशे वंधुसंख्यं ततोऽपकुरु ते कुजः॥ चतुर्थे विंधुहानिं च हायने चाष्टमे धुवं॥ द्वाविंशति
नाशकरः कुजः॥ पुत्रलाभकरः षष्ठतनुविंशे च वत्सरे॥ सप्तमे भूमिजे वर्षे जायानाशं करोति च॥ सप्तविंशतिमे वर्षे शास्त्रभीतिरत
नमेव र्षे विपत्तिं चाष्टमे कुजः॥ मन्दवर्षे पितृनाशं च करोति नवमः कुजः॥ पंचाधिशतिमे वर्षे हानिदो द्वादशः कुजः॥ इति भौमः॥
कुजः॥ पंचवेदमिते वर्षे धनलाभगः कुजः॥ पंचविंशतिवत्सरे चाष्टेऽधननाशं द्वितीयगः॥ २ ततो षोडशे वर्षे
दशमे वत्सरे कीर्तिवृद्धोपद्यति लग्नगः॥ अष्टविंशतिवत्सरे चाष्टे धननाशं द्वितीयगः॥ शत्रोः सकाशान्मृति दो जो रिगः कलि२१ वत्स
द्वाविंशे च चतुर्थगः॥ पुत्रलाभस्त्रवर्षे द्विंशे मातृहा पंचमो वुधः॥ चतुर्दशे वत्सरे चद्रव्यहा राशेर्जो ष्टमः १कोनत्रिंशे
रे॥ स्त्रियं सप्तदशो वर्षे ददाति शशिजो ऽस्तगः॥ शत्रोः सकाशान्मृतिदो जो रिगः कलि२१ वत्सरे॥ देवमातृमृत्युदो नवमो व
ये देवमातृहा पंचमो वुधः॥ शत्रोः सकाशान्मृतिदो जो रिगः कलि२१ वत्सरे॥ धनलाभकरो लाभे द्वादशो हानिदः स्त्रियः॥ इति वुधः॥
धः॥ द्रव्यं नवेंदुवर्षे चाष्टम्यः पंचाधिवर्षके॥

होरा. ७२

प्रजावरोऽष्टमे वर्षे लग्नसंस्थो बृहस्पतिः॥ नवत्रिंशतिमे वर्षे धनस्थस्तत्र मन्दगुरुः॥ सप्तविंशे राजमानेन
एव कुरुते नृणां॥ सुहृत्समागमं विंशे तृतीयः कुरुते गुरुः॥ द्वादशे वर्षे धनयोलाभमीज्यस्थश्चतुर्थगः स्व
मे मातुलारिष्टं कुरुते पंचमस्तथा॥ चत्वारिंशतिमे वर्षे षष्ठस्तत्र मन्दगुरुः॥ सप्तविंशे राजमानेस
एव कुरुते नृणां सुहृत्समागमं विंशे तृतीयः कुरुते गुरुः वैरिभ्यो भयदो रोगः सप्तमो लाभं च बृहस्पतिः १७ त्रिंश
ति वर्षे मृत्यु व्याधिं वरोष्टमः॥ पितुरिष्टं च वदेत् दशमे नवमस्थो वर्षे॥ दशमस्थो पंचविंशे व्ययकृद्व्यय
गो भवेत्॥ इति गुरुः॥ भृगुस्तु दशवर्षे लग्नस्थः परदारगः॥ कवः षष्ठमिते वर्षे द्वितीयो धनलाभदः॥
तृतीये त्रिंशे दारास्यात् तुर्ये गोवधुसौख्यदः॥ चतुर्थे पंचमे वर्षे पंचमे लाभकृद् भृगुः॥ एकादमिते वर्षे
षष्ठे शत्रुमतिप्रदः॥ स्त्रीलाभसप्तमगः स्यात् द्वात्रिंशतितदशे॥ अष्टमे द्वादशे वर्षे स्व परांगमदो भृगुः॥ न
वमे ऽष्टः पंचदशे वर्षे नवमे भृगुः॥ बहुसौख्यं चतुर्थे दशे लाभमयुक्ते अयव्ययदाति॥ भृगुजो द्वादशे गोदधाति
पंचमे वेध नानि च॥ मंदस्याशे हो वैनाक्ष्यपत्नं तत्रैव हि भौमवत्॥ चमत्कारस्य भावफलं तदिल्लाजेन व ७२॥
भाषितं मया॥ इति भावफलं॥ ननु वस्यापि पंचमस्थः सौम्यः संतानं नाशकः॥ पापः संतानकार

कोऽस्य पते॥ तत्र विंकारराशिभि निचेतव्यते॥ सौम्यः शयनचेष्टायां निद्राचेष्टायां स्थितः संतान नाशक
कथित॥ तत्रैव पापसंतानकारकः प्रोक्तः इत्यतो ग्रहचेष्टा चेष्टावशेन सर्वेषां भिन्नं भवति॥ अतो विशेषप
त्वज्ञानार्थं शम्भुमतेस्वं ते न कौमुदीप्रोक्त॥ भावग्रहभाववेष्टा क्रियारोलिख्यते॥ स्थानापद्धि धाभावं यंभुन
गदिता पुरा॥ एतत्सर्वं प्रयत्नेन लिख्यते स्वमयाऽधुना॥ लज्जितो यथा पुत्रे गेहगतः रवे रोराकुंजतो
यथा तथा॥ नवमिंदव कुजेर्षुन्तो लज्जितो ग्रहएव च॥१॥ नगस्थो नगतो वापि त्रिकोणेऽपि भवेत्पुनः॥
गर्वितः सन्निगदितो मुनिभिः कृतनिश्चयैः॥२॥ शत्रुगेही शत्रुयुक्तो [illegible] दृष्टो भवेद्यदि॥ क्षुधितः स च
विज्ञेयः शनियुक्तो यथा तथा॥३॥ जलराशौ स्थितः खेटः शत्रुणा चावलोकितः॥ शुभग्रहान पश्यति
तृषितः स उदाहृतः॥४॥ मित्रगेही मित्रयुक्तो मित्रेणा चावलोकितः॥ गुरुणा सहितो यश्च मुदितः स
प्रकीर्तितः॥५॥ नविरणासहितो यश्च पापाः पश्यंति सर्वथा॥ क्षोभितं न विजानीयात् शत्रुणा यदि
वीक्षितः॥६॥ येषु येषु च भावेषु क्षोभ्यास्तिष्ठति सर्वथा॥ क्षुधितः क्षोभितो वापि स नरो दुःखभाज
नः॥७॥ एवं क्रमेणावबोध्य सर्वभावेषु पंडितैः॥ बलाबलविचारेण वक्तव्यः फलनिर्णयः॥८॥ अ

होरारत्न॰ ४२

न्योन्यं च शुभाशुभं फलं मिश्रं वदेत्पुनः ॥ बलहीने तथा हानिः सबले च महत्फलं ॥ ९ ॥ कर्मस्थाने स्थितो यस्य ल
ज्जितस्तृषितस्तथा ॥ क्षुधितः क्षोभितो वापि स नरो दुःखभाजनः ॥ १० ॥ सुतस्थाने भवेद्यस्य लज्जितो ग्र
ह एव च ॥ सुतनाशो भवेत्तस्य स्त्रियो नित्यं सदैव धा ॥ ११ ॥ क्षोभितस्तृषितश्चैव सप्तमे यस्य वा भवेत् ॥ म्रि
यते तस्य नारी च सप्तमाहर्दिगंबरः ॥ १२ ॥ अन्येषां च स्वभावाश्च प्रोक्ताः शास्त्रे प्रयत्नतः ॥ ग्रहाणां च बलं
बुध्वा फलं वक्ष्ये यथाक्रमं ॥ १३ ॥ शयने चोपवेशे च नेत्रपाणिप्रकाशने ॥ गमने छात्रगमने सभा
यां वसतिस्तथा ॥ १४ ॥ आगमो भोजने चैव नृत्यलिप्सा च कौतुकं ॥ निद्रा ग्रहाणां चेष्टास्तु कथिताः पूर्व
सूरिभिः ॥ १५ ॥ यस्मिन्नंशे स्थितः खेटस्तेन तं परिपूरयेत् ॥ तन्नंशेन संगुण्य स्वनक्षत्रे नियोजयेत् ॥
१६ ॥ तन्नंशेन संगुण्य स्वनक्षत्रे च योजयेत् ॥ जातनामं एकीकृत्य सदा बुधः ॥ रविणा हरते भागं शेषं च
ये नियोजयेत् ॥ नाम्नः त्रिगुणं दत्वा रूपं च द्वादशाहृतं तथा ॥ कुजे च सप्तं बुधे त्रीणि नियोजयेत् ॥
गुरौ द्वादशमं दद्यात् शुक्रे च पंचभागवे ॥ शनौ त्रयमयोदं च राहौ दद्यात् चतुष्टयं ॥ शेषं हतं वराग्रेण
ग्रहाणां त्रिविधं भवेत् ॥ दृष्टिश्चेष्टा विचेष्टा च कथिता मुनिपुंगवैः ॥ यस्मिन्नंशे [illegible] ॥ जन्मनि स्वर्पीद्द्यो ४२

ग्रहा यस्मिन्नृक्षे तिष्ठन्ति तन्नक्षत्रसंख्यया तत्संख्यां गुणयेत्॥ पुनस्तं राशिं नवांशसंख्यया गुणयेत्॥ पुनर्जातस्य ज
न्मनक्षत्रजन्मदंडजन्मलग्नसंख्यां च योजयेत्॥ ततो द्वादशभिः शोधयेत्॥ शेषमिता ग्रहचेष्टा जातस्य पुनर्लब्ध
संख्यया लब्धसंख्यां गुणयेत्॥ नाद्दत्रीङ्गाङ्केन पूरणं नाम॥ तन्मध्ये नयेन नाम्नाद्यक्षरस्याद्यस्वरवर्ण
स्वरसंख्यां संयोज्य द्वादशभिः हृत्वा यल्लब्धं तत्पुनः पूर्वोक्तावस्था तत्र यस्य यस्य ग्रहस्य पूर्वोक्तरीत्या क्षेपकं तस्य क्षेपकं सं
योज्यम्॥ त्रिभिर्हृत्वा शेषे दृष्ट्याद्यवस्था॥ उदाहरणं॥ जन्मनि मघायां रविस्तेन मघासंख्यया १० रविसंख्या १ गुणिता
१० पुनः सिंहस्थांशोर्कस्तस्मात्सप्तभिर्गुणिता ७०॥ पुनर्जन्मभमनुराधा १७ उदयाद्गतघटी ४५ वृषलग्न २ एषां सं
ख्यया पूर्वांको युतः १३४ द्वादशभक्तं शेषं २ तेनार्कस्योपवेशनावस्था॥ २ तदवस्थांकगुणिता ४ तत्र हकारनामाद्यस्वर
अकार तत्संख्यया १ युता ५॥ द्वादशावशिष्ट ५ नोक्षेपक ५ युत १४ त्रिशेषं २ तेनार्कस्योपवेशने चेष्टावस्था एवं च
ऽन्येषामपि॥ दृष्टौ स्वल्पं फलं ज्ञेयं चेष्टायां विपुलं फलं॥ विचेष्टायां फलं न स्यादेवं दृष्टिफलं विदुः॥ शुभाशुभं ग्रह
णां ग्रहराशीनां च समीक्ष्य प्रबलाबलं॥ तेषां स्थानविशेषेण फलं ज्ञेयं तथा बुधैः॥ निद्रायां च यदा पापो जायास्थाने
शुभं वदेत्॥ यदि पापग्रहे दृष्टे न शुभं च वदेत्तदा॥ यदि वा शत्रुदृष्टौ स्याद्विपुलाय स्त्रीवियोगतः॥ तदा नारी मृता न
गे१

हो॰ रा॰ र॰ सप्तमेत्वष्टमे सुनिश्चितं॥ शुभग्रहैर्यदा दृष्टः शुभग्रहैः समन्वितः॥ नारीवा स्त्रियते तस्य स्वप्रमावशिरोधनः॥ सुतः स्थाने स्थि
तः पापैर्निरीक्षितः शयनेपि वा॥ तदाशुभं भवेत्तस्य न कार्या विचारणा॥ लग्नस्थाने स्वगेहे वा त्रिकोणे वा यदा भवेत्॥ त्र
॥७४॥ न्त्यस्य तदा नाशो जायते नात्र संशयः॥ शुभग्रहे यदा तत्र शुभैर्वापि दिवीक्षितः॥ तदापि स्वप्रमापत्यनाशो भवति नि
श्चितं॥ मृत्युस्थाने स्थितः पापैर्निरीक्षितः शयनेपि वा॥ तदा तस्य भवेन्मृत्युः स्याज्जातः परस्तथा॥ शुभग्रहैर्यदा दृष्टः
शुभैर्वापि दिवीक्षितः॥ तदा स्वमरणं तस्य गंगायां च विशेषतः॥ पापग्रहैर्यदा दृष्टः शुभो वा राज्ञ वीक्षितः॥ तेन तस्य शिरः
छेदो मुनिनापरिकीर्तितः॥ अष्टमस्थो राशिनि कुजो मेषो वा तत्र संस्थितः॥ अपमृत्युर्भवेत्तस्य शिरश्छेदान्न संशयः॥
कर्मस्थाने यदा पापः शयने भोजनेपि वा॥ तदा कर्मविपाकः स्यान्नानादुःखप्रदायकः॥ कष्टान्भ्रमति मेदिनी॥ कर्म
स्थाने यदा खेटे निद्रायां गमनेपि वा॥ तदा कर्मविपाकः स्यान्नानादुःखप्रदायकः॥ दशमस्थो निशानाथो भौमो बुधो
चेत्प्रकाशने॥ तदा राज्यभोगः स्यान्मुनिभिः परिकीर्तितः॥ एवं क्रमेण वा बोध्य सर्वभावेषु बुद्धिमान्॥ बलाबल
विचारेण जायते च शुभाशुभं॥ ज्योतिर्विद्भिः पुरा सर्वैः ज्ञायते तत्त्वनिर्णयः॥ इदानीं स्पष्टरूपेण शयनादिनि
गद्यते॥ शयनाद्येषु भावेषु यस्य तिष्ठति सद्ग्रहः॥ नित्यं तस्य शुभं प्रोक्तं मुनिभिः परिकीर्तिताः॥ भोजनाद्येषु भावेषु पापास्ति ॥७४॥

दृष्टितिसर्वथा॥ त्वासर्वविनाशोपिनाशःकार्यालितास्तथा॥ भौमाग्निः पित्तशूलीचअग्नीभीचनसंशयः गृहस्थानेभवेद्रो
गोजायतेशयनेरवौ॥ शुक्रवेश्मभवेत्कुष्ठीत्वपामण्डलीभवेन्नरः॥ शनिविघ्नोरतेउष्ठीपरसेवासुतस्करः पंचमेनव
मेवापिदशमेसप्तमेपिवा॥ नेत्रपारीयदास्तूर्यैः सर्वसौख्यसमन्वितः॥ नेत्रेपारीभवेत्केतोजलशोषीभवेन्न
रः॥ चतुरोगीमहाक्रोधीपरद्रव्यीतथापुनः॥ पुण्यवान्धार्मिकश्चैवधनवांश्चप्रकाशने॥ शनौभौमेतथाभवेन्मानी
राजपात्रोधनाधिपः॥ सप्तमेपंचमेवापिप्रकाशचयदाबुधः॥ नारायणश्चपत्यकलत्रंचविशेषतः॥
प्रवासीगमनेभानौपादम्लेच्छजान्वितः॥ निद्रालस्यभयक्रोधीजायतेवनराधमः॥ क्रूरः कुबुद्धिः कुशलोदांभि
कः कृपणास्तथा॥ परदारेष्वभिरतश्चिन्तापतंगमनोन्मुखः॥ सप्तमेतुयदावापियदिदेवाङ्गेवक्रजितः॥ अप
त्यनाशयेत्तस्यधनमल्पंचनिश्चितं॥ नवमस्थोयदासूर्यो भोजनस्थोपराभवेत॥ तदापुण्यमहाविघ्नंक
रोतिचनसंशयः॥ धार्मिकोधनवांश्चैवनानाविद्यासुतेनरः॥ विपद्बुद्धिः शुचिर्वक्तासदाभूतपनेजनेः
सोमितोदुःखितश्चैवनानादुःखप्रदायकः॥ भौमेभूखंभागमनेकुरूपोधनवान्भवेत॥ भोजनेनित्यदुःखीस्या
न्मांसलुब्धोभवेन्नरः॥ शिरोरोगीकटिरोगीसंधौभवतिवेदना॥ पंडितश्चुद्रस्तोवामीन्नमोन्ताहेगृहाधिपे॥ ६

से०र०रत्न०

॥७५॥

मूलरोगी भवेन्नित्यं धनवान्धार्मिकः सदा ॥ षष्ठस्थाने भवेद्यापि कौतुकस्योपकारिणः सर्वशत्रुविनाशः स्यात्सप्तमं च
लभते नरः ॥ उत्साही च महाबुद्धिः कौतुकस्याष्टमे जनः ॥ दाता भोक्ता महाभोगी हि भार्या बहुभाषकः ॥ छत्रादिवो पि देहे
स्यात्तदूतोगी भवेत्सुखः ॥ महादुःखं महाक्रोधी जायते वनरोत्तम ॥ सप्तमे पंचमे वापि यदि देवाङ्गवेरपुनः ॥ कु
लत्रं नाशयेत्तस्य पूर्वार्धे पंचं च निश्चितम् ॥ लिंगांतगुदरोगी स्यात्स्त्रीपदीर्घविशेषतः ॥ निद्रापाच भवेद्वानो
क्रोधेनारक्तनेत्रकः ॥ नित्यप्रवासी दुःखी च दरिद्रो विकलो महान् ॥ अपमापस्मनाशः स्यात्कुलत्राणां विशेषतः ॥
इत्यष्टमभवफलं ॥ तुंगात्तुंगबलाबलैः ज्ञातव्यं फलतो बुधैः ॥ शयने च विधेर्क्रोधी दरिद्रो बललंपटः ॥ गुह्यस्थाने
भवेल्लिंगे चिह्नं माघे सुनिश्चितम् ॥ एतत्सर्वं विलग्ने च चिंतनीयं सदा बुधैः ॥ अन्यभावे यदा जातो ननाह्रक्रदोष
एव च ॥ कृष्णपक्षे भवेद्व्याधिः परनारीभिकस्सदा ॥ भत्वंश्च महाभूरोलंपटः एवं निंदकः ॥ दक्षिणांगे लनावि
स्वबहो भवति निश्चितम् ॥ सर्पभीतिस्तथा ह्येषा जले चैव महद्भयं ॥ भोजने च विधौ जातो ज्ञातिभिः परिभूषितः
ज्ञानाभोक्ता तथा मानी धनवांश्च भवेन्नरः ॥ क्रूरकर्मा चिरंजीवी स्त्रीपदश्च महाकुशः ॥ नित्यप्रवासी भोगी च ॥७५॥
जायते नरसंशयः ॥ जातो जनस्य चेष्टावां गुणवान् धार्मिको भवेत् ॥ धनवान् बहुपुत्रश्च ख्यातश्च जायते नरः ॥

कौतुके च भवेद्रूपेनानाविद्यासुतत्परः ॥ उत्साही च महामानी जायते वसुनिश्चितं ॥ नवमे दशमे वापि कौतुकस्थे निशा
करः ॥ तदा स्वे सुखं विद्याहारि द्रुं नकरा च न ॥ निद्रायां द्दुरोगी च लेशी पापात्मजान्वितः ॥ पुत्रशोकी महादुःखी नित्यं भ
यतिमे दिनी ॥ कर्मस्थाने विशेषेण एवं ज्ञेयं सहद्बुधैः ॥ अन्यभावेनु निद्रायां वैपरीत्यं वदेत्सुनः ॥ परद्वेषी प्रवा
सी च पित्तशाली भवेन्नरः ॥ दुष्पवेशो वरोगी च धनहीनो भवेन्नरः ॥ कृपणः कुटिलश्चैव दंडघाती भवेन्नरः ॥ ने
त्रपाणावह्निरोगी श्लीपदी बहुभाषकः ॥ क्रूरः खलो तिमूर्खश्च जायते च विधौ सदा ॥ प्रकाशने निशानाथे धनवा
श्च भवेन्नरः ॥ प्रकाशगेहे कृपणास्त्री पूर्वे च गमने ऽमुखः ॥ स्थूले एवं कृष्णपक्षे भिन्नं ॥ प्रवासी च क्रूरे कम्पी नो वि
त्तहीनो विशेषतः शिरोरोगी दन्तशूली जायते गमने विधौ ॥ नानामतिर्महापापी श्लीपदी च भवेत्सुनः ॥ जा
नेच्छायां विधौ जातो धनहीनो भवेन्नरः ॥ एतावधार्मिकश्चैव राजपुत्रो भवेत्सदा सभायां च विधौ नित्यं जा
यते पुरुषोत्तमः ॥ बहुभाषी प्रियः शांतो हि भार्याधार्मिकः सदा ॥ किंचिद्वदेहमाधेस्त्र्यपत्यं बहुलं भवेत् ॥ सन्नजा
च भवेन्नारी एकपुत्रो भवेत्सुतः निर्लज्जो धी महादुःखी भवेद्गमने विधौ ॥ भोजने च महालुब्धो सुतस्थाने विशे
षतः ॥ जायास्थाने पि नियतं तत्फलं परिचिंतयेत् ॥ कन्यापत्यं च बहुलं जायापत्यं ध्रुवं गुरुस्सहितस्संज्ञेय त्र
गा ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हो.सार. तत्रस्थितोभवेत्‌ यदिनिद्राभवेत्तत्रसर्वंभद्रंभवेत्पुनः शत्रुराशसहितस्थंशेयदिनिद्रापितोभवेत्॥ ततःसर्वविनाशःस्यात्
॥७६॥ तोपाश्चैवसहस्रशः॥ इतिवेश्मभावफलम्॥ अथाग्नेयचक्रजैसौतेलंपटःकृपणःसुधीः॥ महाक्रोधीमहादक्षःसंगतोजायतेन
रः॥ पंचपेसप्तमेवापिशायनेस्थायहाकुजः॥ नाशयेत्प्रथमापत्यंनारींचप्रथमांपुनः शत्रुगेहीयदाभौमोनिपुणा
चावलोकितः॥ पुजघ्रेणभवेत्पुत्रवक्रलाहिविशेषतः॥ शनिराहुसमायुक्तःसर्वथोमृतभवेत्॥ ततःस्वशिरश्छेदी
मुनिभिःपरिकीर्तितः॥ शयनेवयदाभौमोनानारोगसमन्वितः देहभंगमवाप्नोतिदुष्टविधिविकेः उपवेशोय
दाभौमोजायतेचनराधमः॥ धनवान्नकर्मावनिपुरोसानवर्जितः॥ पापशीलोमहारोगीदरिद्रोविकलोमहा
न॥ यदिलग्नेविशोषेगावत्तत्वंचमुनिश्चितम्॥ धर्मस्थानेभवेत्पुत्रवंक्षस्थानेविशेषतः॥ ततःसर्वविनाशःस्या
त्तत्पापत्रलत्रयोः॥ शुभैर्यदिसमायुक्तोपित्रयुक्तोभवेत्पुनः॥ तदेतद्विपरीतेचज्ञातव्यंवबलाबले॥ नेत्रपाणौ
चयोजातोवस्तुहीनोभवेद्ध्रुवः पुत्रदारधनैस्त्यक्तोदारिद्र्येनवर्धते॥ तल्लग्नेविवर्धं अन्यस्थानेस्थितो
भौमोनेत्रपाणौयदाभवेत् ततःसर्वसुखंतस्यपुत्रदारधनैर्युतः॥ देहमध्येभवेत्किंचित्संधोभवतिवेदना॥ ॥७६॥
व्याघ्रभीतिसर्पभीतिश्चाग्नेभीतिर्जलाद्भये॥ द्वितीयेसप्तमेवापिधनहीनोभवेन्नरः॥ जायाचमृपतेतस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

भूमिजीवी भवेन्नरः ॥ त्र्यंगदोषश्च भवेल्लिंगे चिह्नं गुह्ये भयमद्भुतम् ॥ एतल्लग्ने भवेद्दैवं समन्यभावे पुनैवच ॥ नानाधनमहाद
ण्डराजपात्रो भवेन्नरः ॥ किं तस्य बहुनाद्येव रात्रौ नैमित्तमेव च ॥ दिता भोगी भवेद्देव जायते चनरेश्वरः ॥ प्रवासे गमने छायां गु
द रोगी भवेद्ध्रुवः ॥ धनहीनः कुलीनो वा जायते क्षितिपस्य तु ॥ एतल्लग्नमयं रता सभायां वयदा जातो धार्मिको बहुसंप
दः ॥ गुणवान्सुमहाप्राज्ञः शीरोरोगी भवेद्ध्रुवः ॥ नवमे पंचमे चैव समभावयुते कुजे ॥ विद्याहीनः कर्महीनो धर्मविघ्नः
पदे पदे ॥ सुतस्थाने यदा भौमो महादरो भवेत्सुतः ॥ नदा सर्वसुता नहंति किं पितामुनिपुंगवेः ॥ कुजस्यागमने नि
त्यं स्वजो भवति नान्यथा ॥ कृती रोगीपि तत्शत्रौ [illegible] नरोधमः ॥ धनवान्धार्मिकश्चैव यदि स्यान्कुमा
नेपुनः ॥ नानाधनी महामानी स्त्रीभार्यो बहुपुत्रकः ॥ भोजने भूमिजस्यापि यो जातो मासलुब्धकः ॥ स्वत्पाश्वा
शमराक्रो धीनि त्यन्सा हि धनान्वितेः ॥ अष्टमस्थो यदा भौमो शयने भोजने पिवा ॥ तदा तस्य पमृत्युः स्यात्प
शुभिर्हन्यते नतः ॥ कुजस्य नक्षमालिस्थो यो जातो धनवान्भवेत् ॥ दानाभोक्ता च दासो स्वं धनेश्वरभवेन्नरः
लग्नेद्वितीयको वापि वर्षस्थानेस्थितो पिवा ॥ सप्तमेपि यदा भौमः सर्वसौख्यप्रदायकः ॥ अष्टमो नवमस्थो वा
नानादुःखप्रदायकः ॥ अपमृत्युर्भवेद्देव धर्महानिः पदे पदे ॥ कौतुके दिति जस्यापि जातो भवति पंडितः ॥ जो

होरार.
७१

नाथनैः सुसंयुक्तो हि भार्यो बहुजन्यजः ॥ वित्तायपंचमस्थाने सप्तमे नवमे तथा ॥ तत्रैव विपरीतेतु जातः खेचरसुनि
श्चितं ॥ विशेषतश्च वैकुंल्ये नेत्ररोगसमन्वितः ॥ अपमापत्यनाशः स्यात्कुलक्षयं तथैव च ॥ निद्रापो च कुजो
जातो मूर्खो भवति पंडितः ॥ धनहीनो नराः क्रोधी जायते च नरोधमः ॥ लग्ने द्वितीयगे वापि तृतीये नवमे पिवा
दशमे वा दशे चैव पतद्व्यं नपाबुधे ॥ पंचमे नवमे वापि यस्य निद्रापितः कुजः ॥ तस्यापत्यस्य चाल्पत्वं नाना
दुःखसमन्वितं ॥ राहुणा सहितो भौमो यदि निद्रापितो भवेत् ॥ नाशयेत्तु अपमापत्यं नानादुःखप्रदायकः ॥ धन
वान्बलसंयुक्तो रागतो सर्वगुणान्वितः ॥ किंचिद्रोगो भवेत्तस्य पादस्खलेरजान्वितः ॥ इति भौमभावफलं ॥
शयने च बुधो जातो बलवान्बद्धुधितस्तथा ॥ अंगच्छेदी भवेद्वापि रंजो भवति नान्यथा यदि लग्ने भवेद्वापि
नतद्वा च्युतपावुधेः ॥ अन्यस्थाने स्थितश्चैव शरीरे व्रणलंपटः ॥ उपवेशो बुधे जातो सवाग्मी जायते ध्रुवं भवि
ताग्रण संयुक्तो गौरवर्णो महासुधीः ॥ यदि पापसमायुक्तः शत्रुणा परिवीक्षितः ॥ महापातकयोगो वै विज्ञेयो ना
पीरकीर्तितः ॥ स्वस्थहीनियतो सौ वा नानादुःखप्रदायकः ॥ पुण्यवान्धार्मिकश्चैव चतुर्योगश्च के बलम् ॥ ७१
नेत्रपारोगं तथा जातः श्रीपदी च तथा शौः ॥ विद्याहीनो विशेषेण पुत्रनाशो भवेद्ध्रुवं ॥ पंचमस्थाप

द्वैसेस्थोनेत्ररोगी भवेद्धि रोगनाशये अयमं पुत्रं कन्या च बहलो भवेत्॥ ग्रहेकोराने भवेद्यातो धार्मिकोपि धनान्वितः॥ ना
नागुणसमायुक्तो जायते वै कपारग॥ गमने च बुधे जातो जलेन हृष्टो भवेन्नरः वाणिज्ये धनलाभश्च सर्वार्द्धितिज्ञ
लेभयं॥ नानादुःखं भवेत्तस्य सर्वरोगसमन्वितः॥ दंतघाती भवेद्धैव कलहो नित्यमेव च॥ सभायामपि यो जातो ल
रोगी भवति निश्चितं॥ धनवान्धार्मिकश्चैव चिररोगी भवेद्ध्रुवः॥ पंचमे द्वादशो वा सभायां बुधो शुभः सुख्यापत्य
बहुलं दत्ते कार्यलाभं विशेषतः॥ सप्तमे च पदासो यः सभायां व्ययहास्थितः॥ तदा सर्वसुखं के स्नेव सौङ्गुरामदः॥
हीनः खलो ऽतिमूर्खश्च पापशीलो भवेन्नरः॥ बुधस्यागमने नित्यं जायते नराधमः॥ पुत्रद्रव्यं धनं क्लिं चित्रामा
मतिश्च जायते॥ गुह्यस्थाने भवेद्रोगं मूत्रकृच्छ्रं गुदामयं॥ भोजने च बुधे जातो धनहीनो भवेन्नरः परद्रव्यीश्च वा
सी च रोगैश्च सर्वदान्वितः॥ स्तनादिर्वा मेदरेहे चैवराज्यदुवि चर्चिका॥ कटकलवेदनाचैव शिररोगी विशेषतः॥ यो जा
तो नृत्यलिप्सायां धनवान् पंडितः कविः॥ उत्साही च महाहृष्टो भुनक्ति सुखमद्भुतं पंचपुत्री भवेत्सोपि चतुरस्त्र
सस्य कन्यका॥ भार्यारूपं तथा ज्ञेयं सर्वगुणसमन्वितं॥ कौतुके तु यदा जातो भवेत्सर्वजनप्रियः॥ प्रयमाय

होरारत्न ॥७८॥

न्यहानिः स्यात्सुपन्थ्ये फलं भवेत्॥ कर्मस्थाने भवेद्वापि धर्मस्थाने तथैव च नानासुखं भवेत्तस्य सर्वकर्मसम
न्वितः। निरापं च यशजातः सर्वदुःखैकभाजनः॥ अल्पायुश्च भवेत्सोपि विवादी च न संशयः॥ तनुस्थाने भवेद्वा
पि कर्मस्थाने तथैव च॥ पूर्वोक्तं च फलं प्रोक्तं तत्स्वं स्यात्सुदारुणं अन्यस्थाने भवेद्वापि विपरीतं फलं वदेत्॥
धनधान्यपुत्रं चैव वक्तव्यं सुनिश्चितम्॥ इति बुधभावफलं॥ बलवान्दुःखितो गौरः स्थूलरोगी सुतान्वि
तः॥ जीवस्य शयने जातो मानवो नात्र संशयः॥ पदि लग्ने भवेद्वै वसन्तमे दशमे तथा नवमे पंचमे चैव
धनवान् पंडितः शुचिः॥ अवे रोगुरो दुःखी बहुभाषी निरोगवान्॥ दन्ताघाती मतः [illegible] रोगसंयु
तः॥ द्वितीये द्वादशे वापि ततो षष्ठे कादशे तथा॥ सर्वगुणसमायुक्तो नानाविद्यासुतत्परः॥ नेत्रपातो तथा
गौरः शीर्षरोगी तथा भवेत्॥ कार्यहानि भवेत्तस्य संशयस्तु पदे पदे॥ छत्री दिव्यरोगी नित्यं लग्ने चैव न संश
यः॥ नवपञ्चमे वापि नेत्रपातो भवेत्॥ [illegible] भवेत्तस्य गंगापानं सदा ध्रुवं॥ गुरौ प्रकाशे धनवान् नाना ७८
न्नसमायुतः॥ राजपात्रो भवेन्नित्यं लग्ने वा दशमेपि वा॥ यद्यन्यत्र भवेज्जीवो वालिंगेतु [illegible] न्वितः॥

नरविस्तुलं पदः पापीरयाभवर्णो गजान्वितः सेवाकर्मरतः स्त्रीप्रवासी धनवानपि गुरुश्चगमने छायां जातो भवति
मानवः॥ द्वितीये पंचमे चैव सप्तमे दशमे तथा॥ अन्यस्थाने भवेद्वापि वैपरीत्येन चिंतनं सर्वभीतिश्चोरश
मोसाहसी गमने गुरो॥ पराक्रमे वित्ते धनवान् रासेवान्वितो नरः पंडितः सुंदरो वाग्मी सभायां गीयते स्थिते॥
केन्द्री चैव पराक्रमी वः सभायां च भवेत्सुनः॥ तदा सर्वसुखं ते च पुत्रदाराधनैर्युतं यदि देवा भवेद्वापि द्वादशे चा
ष्टमे तथा॥ तदा सर्वविनाशः स्यात्सत्स्वरो दुःखभाजनः॥ धार्मिकस्तीर्थवान्वाग्मी भवेद्गमने गुरोः नाना
तीर्थकृतो नित्यमुत्साही हीनः सगर्वितः॥ भोजने विविधं सौख्यं मांसलुब्धो महाबलः कामुकः प्रियवादी च यदि
लग्ने भवेत्सुनः पंचमे नवमे चैव पुत्रधर्मसमन्वितः॥ गृहांते भवेद्वापि सर्वरोगसमाकुलः रत्नच्छायां भवेत्
वाग्मी धनवान्सात्विकस्तथा॥ महैश्वर्येन संयुक्तो जीवस्य तु भवेन्नरः॥ लग्ने वा नवमे वापि दशमे पंचमे तथा
निश्चभावेषु यो जातः स्वल्परोगी भवेद्ध्रुवं कृपणो बहुभाषी च दुःखितो भ्रमितो महीं पंचमे सप्तमे वापि
नीचस्थाने तथापि च॥ स्त्रीनाशः पुत्रनाशश्च द्वादशे च धनवान्भवेत्॥ इति गुरुभावफलं॥ शुक्रस्य शयने जातो धन

होरारत्न.
७९ वान्धुतुल्यं पदे नारं तेन रोगी प्रकृत्या क्रोधी दैन्यो भवति लग्नगः ॥ सप्तमे काद्दशो वापि शयने च भंगो भवेत् ॥ तपात्सर्वसुखं ज्ञेयं रा
रिःघ्रं नवकरावने ॥ अल्पं च बहुलं चैव सप्त पुत्रास्तु निश्चितं ॥ पंचकन्या तथा ज्ञेया गृहस्यास्य बलाबलं ॥ अन्यगेहेषु
धनवान् विद्यावान् धार्मिकः पुनः ॥ नानासुखं भवेत्तस्य पुत्रनाशो भवेद्ध्रुवं ॥ उपवेशे भंगो जातो बलवान् धार्मिकः स
दा ॥ दक्षिणांगे स्तनादेश स्वंधो भवति वेदना ॥ तुंगस्थाने भवेद्वापि स्वगृहे मित्रसंयुतः ॥ तदा सर्वसुखं प्रोक्तं पुत्रदारधन
रः ॥ नेत्रपारो भंगो जातस्य दुर्नाशो भवेद्ध्रुवं लग्ने वा सप्तमे वापि तदा भवति निश्चितं ॥ कर्मस्थाने यदा भु
के नेत्रपारो भवेद्यदा ॥ तदा रोगक्षयो रोगः समुद्भवति योगयेत् ॥ अन्यस्थानेषु सर्वेषु हि भार्या बहुसंपदः ना
नातीर्थपुरोगमानो सारसीरा कुलसेवकः ॥ प्रकाशने भंगो जातो धनवान् धार्मिकः शुचिः ॥ लग्ने वापि हि नीचे वा नव
श्री. मे व्ययसंज्ञके ॥ मित्रगृहस्थितो वापि तुंगस्थानगतोपि वा ॥ तदा राजं लभते तु कर्मस्थाने विशेषतः ॥ अन्यग्रहे
षु युक्तः सर्वरोगसमन्वितः ॥ नित्यं प्रवासी दुःखी च जायते न संशयः ॥ गमने छायां वपो जातो भर्तृनाशो
भवेद्ध्रुवं ॥ माता च मरणं तेन तस्य शरीरे व्याधिसंयुतः ॥ आगमने जातः पादस्तेनाद्ध्रान्वितः निरुत्साही ७९

सभायांच धनाधिपः॥ कुशलः सर्वकार्य्येषु केवलं श्मरलनोगवान्॥ सन्तुगेहे यदा पुत्रः शत्रुयुक्तो प्रवेशितः॥ ततस्सर्ववि नाशस्यान्ना
महाशिल्पी तीर्थेषु तत्परो भवेत्॥ सभायां च मृगो जातो दुःखितो बहुभाषकः॥ दद्रुरोगी पुत्रशोकी जायते च नराधमः॥ नोरोगसमं
नियुगेहे स्थिपुतो नियुनावी स्थिते यदा॥ ततस्सर्वविनाशः स्यात्स्त्रीपुत्रस्य विशेषतः॥ द्वितीयदशमे वापि चतु न्वितः॥ मृगो
र्थे चाष्टमे तथा॥ सर्वसुखं भवेत्तस्य नात्र कार्य्या विचारणात्॥ पुत्रस्य भोजने जातो बलवान् हृष्टमितः सदा॥ म रागमनेजो
हाधनी भवेन्नित्यं वाणिज्येनाथसेवया॥ मंदाग्निपित्तश्लेष्मोच शिरोरोगैस्समान्वितः नानादुःखं भवेत्तस्य ग्र नो
वासीपनसेवकः॥ मृत्स्नायां च यो जातः स वाग्मी जायते ध्रुवम्॥ पांडित्यं कृपिता चैव वर्द्धिते चन्द्रे दिने॥ यदि दे
वाद्वेन्द्री चामरैर्भवतीति निश्चितम्॥ तुंगस्थाने स्वगेहे वा राजपुत्रो महाबली कामुको बहुकोतश्च नानायो
षित्प्रियं सदा॥ श्यामवर्णस्तु यामानौ हरिणकौलंपटः सदा॥ पुत्रस्य कौतुके जातो धनवान्स्यात्त्रिकोमहा
न्नू महाहृष्टो महावक्ता कौतुकी च भवेत्सदा वधूपुत्रकलत्रश्च नानासुखसमन्वितः नीचे तद्विपरीतं स्याद्दुःख
शोकभयानकः॥ निद्रायां च मृगो जातो भवेत् रोगी सुनिश्चितम्॥ निम्नले यस्य युतो रोगी दरिद्रो विकलो महान्॥
मृत्युः स्यान्तु जायायां यदि निद्रां मृगो रपि॥ ततः सर्वविनाशः स्यात् हिंसुनापनिन्द्रो र्त्तिते॥ इति पुत्रभावफ

सं॥ शयने च शने जातो क्षुधितो विमलस्तथा गृहस्थाने भवेद्रोगको शत्रुरुग्भ जायते॥ लग्ने षष्ठाष्टमे चैव शयने
च शनैश्चर:॥ तदा नित्यं प्रवासी स्याद्दरिद्रो विकलो महान्॥ पंचमे नवमे चैव दशमे सप्तमे तथा॥ पुत्रवान्धार्मि
कश्चैव सर्वसुखप्रदायक:॥ उपवेशे यदा जात: श्लीपदी दद्रुसंयुत:॥ धनहानिं नरे क्षिप्रं पीडा भवति नित्यश:॥
लग्ने वा दशमे वापि पुत्रदारधनक्षय:॥ नेत्रपाणौ शनैश्चर:॥ कार्श्यं वाधा भवेत्तस्य सर्वदुःखप्रदायक:॥ सप्तमे
पंचमे वापि पुत्रदारधनक्षय:॥ प्रकाशे हेतु धनवान्नानासुखप्रदायक:॥ नेत्रपाणौ यदा जातो मूर्खो भवति पंडि
त:॥ धनवान्धार्मिकश्चैव बहुभार्यो बहुसम्पद:॥ पित्तशूली नरो क्रोधी कामिनीति जलाद्भयम्॥ शिरोरोगी
गुह्यरोगी संधौ भवति वेदना॥ लग्ने च दशमे चैव विपरीतं फलं वदेत्॥ प्रकाशने च यो जातो राजपुत्रो भवेद्ध
स: नानागुणो गुणवान् धार्मिक: पंडित: शुचि:॥ जायास्थाने च लग्ने च प्रकाशे च प्रदायिनि:॥ तदा
सर्वविनाश: स्यात् ज्ञातिध्वंसो भवेद्ध्रुवम्॥ गमने च यो जातो बहुपुत्रो महाधन:॥ पंडितो गुणवा
न्दाता जायते च नरोत्तम:॥ गमने च शनैर्जात: श्लीपदी रोगसंयुत:॥ दन्तघाती भवेत्क्रोधी कृपण:
परनिंदक:॥ सुतस्थाने कलत्रे वा शनिस्तत्र भवेद्यदि॥ तदा सर्वसुखं हन्ति कलत्रं च विशेषत:॥ ॥८०॥

गमनेचशनौलग्नेपापसंयुते—रुजान्वितः॥तीर्थंचगमनेनित्यंपुत्रदानैर्विवर्जितः॥कर्मस्थानेतुलग्नेवाधर्मेवाद्वादशो
पुनः॥तदासर्वसुखंप्राप्तःपंडितोपिधनेश्वरः॥सभायांचशनौजातःपुत्रदानैर्धनैर्युतः॥सर्वत्रलभतेविद्यांनानारत्न
समन्वितः॥शत्रुःस्थानेगतःशौरिःशत्रुणापरिदीपितः॥तदासर्वविनाशःस्याच्छिद्रैर्नापरिकीर्तितः॥गमनेशयनेजा
तोमहाक्रोधीरुजान्वितः॥सर्पादिभिश्चसंदष्टोभ्रातृनाशोभवेद्ध्रुवम्॥लग्नेपतोच्छिन्तितं॥द्वितीयेवातृतीयेवापंच
मेसप्तमेतथा॥क्षितिपुत्रकलत्रैश्चभ्रातृभिःसहमोदते॥नवमेस्थोयदाशौरिर्भवेद्गमनेपुनः॥तदापुण्यंभवे
द्यानिर्विघ्नःस्याच्चपदेपदे॥भोजनेचयदाजातोमन्दाग्निश्चमहाभवेत्॥अर्शरोगीचशूलीचचक्षुरोगीभवेद्ध्रु
स॥तुंगस्थानेस्वगेहेवाभोजनेचयदाशनिः॥तदासर्वसुखंदेहेपंसर्वरोगविवर्जितः॥नृत्येष्ठायांचयोजातो
धनवान्धार्मिकोभवेत्॥नानाविधंस्यतसौख्यंभवेत्तस्यनसंशयः॥नानाधनोधनीमानीसर्वसुखप्रदायकः॥
कौतुकेचयदाजातोशत्रुपुत्रोमहाधनी॥दाताभोक्तामहादक्षोधार्मिकःपंडितःशुचिः॥पंचमस्थोयदासौरिर्न्द
त्वलिप्साभवेद्यदि॥नाशयेत्सकलान्पुत्रान्इतिप्राहदिगंबरः॥पंचमेसप्तमेवापिनवमेदशमेतथा तद
सर्वविनाशःस्यात्सर्वरोगसमन्वितः॥निशायांचशनेजातोधनवान्पंडितःशुचिः॥चक्षुरोगीपितस्कृली

होरा र.

॥८२॥

द्विभार्यो बहुपुत्रकः॥ कर्मस्थाने यदा शौरिर्विशेषफलदायकः॥ यदि स्याद्द्वेष्टिद्वा नाशो भवति निश्चितं॥ कार्य्यना
शो धर्मनाशः दुःखितो दुःखितः सदा॥ नित्यं प्रवासी योगी च कार्य्यहानिः पदे पदे॥ यदि तुंगी त्रिकोणांश केंद्रस्थः स्व
गृहे पुनः॥ तदा सर्वं विपर्यासं वैपरीत्येन निश्चितं॥ सुतस्थाने यदा जातो यदि निष्प्राभने भुनः। तदा सर्वं
शुभं विंद्यात् द्विभार्यो बहुपुत्रकः॥ इति शनिभावफलं॥ शयने च यदा राहोर्यस्य जन्म भवेत्पुनः॥ तस्य क्लेशो
महादुःखं जायते च न संशयः॥ शयने च यदा जातः स्त्रीपक्षे च न संशयः॥ धनहानिर्भवेत्तस्य पीडा भवति नि
त्यशः॥ मिथुने च तनपास्तिं स्त्रियायां पप भेतथा॥ सर्वसुखसमायुक्तः शयने च विधुंतुदे॥ उपवेशे च यो जा
तः स्त्रीपतितेन संयुतः॥ धनहानिर्भवेत्तस्य पीडा भवति नित्यशः। नेत्रपाते यदा जातस्य सुरोगी भवेद्ध्रुवम्॥
तस्यार्तिं च महाचेष्टा व्याधा येव विशेषतः; अधर्मपुत्रवित्तं स्यात् स्त्रीभ्यो धनवानपि॥ अंते क्रूरो महाधैर्य्य
स्यागो चाच्छुभाजकः॥ कोशेपार्श्वे भवेद्विघ्नं शैशवे च रुजान्वितः निजवेश्मे यदा राहुर्वा पापं वंधो महानपि॥
नेत्रपाते यदा राहोर्लग्ने वा सप्तमेपि वा तदा सर्वं विनाशः स्यात् सर्वदुःखप्रदायकः गृहस्थाने भवेद्रोगी जले ॥८१॥
चैव भवेद्भयं॥ नवमे दशमे वापि गमने च भवेद्यदि॥ प्रकाशने च यो जातो धनवान्धार्मिकः सदा॥ नि

त्पप्रवासी चोत्साही सात्विको नाजसेवकः सिंहेवा कर्के वापि यदि राहुप्रकाशने ॥१२॥ ध्रुवकरो योगो विज्ञेना प
निकीर्तितः ॥ गमने स्थायाच यो जातो बहुपुत्रो महाधनः ॥ पंडितो गुणवान्दाता जायते च नराधमः ॥ गमने
चयदाजातो नानारोगधनक्षयः ॥ रत्नाघाती महारोगी पिशुनः परनिंदकः ॥ व्याघ्रभीतिः सर्वभीति
निर्गद्स्पो दुरासदः ॥ स्त्रीनाशो धननाशश्च बंधुहीनो भवेन्नरः ॥ सर्वांयाच यदाजातः कुपरो धन
संयुतः ॥ नानागुणो नगुणवान्धार्मिकः पंडितः शुचिः ॥ लग्ने वा दशमे वापि पंचमे च यदा भवे
त्॥ भार्यापुत्रविनाशः स्याद्धिन्न नाशोः । निचं वलः । आगमने च यो जातः स बंधुःखप्रदायकः सु
हृद्धुविनाशः स्यान्नानाक्लेशोपि जायते ॥ भोजने न महालुब्धो सदा निश्चरुजान्वितः ॥ दुःखितः पु
पनश्चेव नृनश्च कलहप्रियः ॥ यदि देवाद्रुवे वे वलग्ने वा विघ्ने पि वा ॥ पतिते च विजानीयाद्द्वंद्वं
शोभवेद्यदि ॥ सप्तमे दशमे वापि भोजने च यदोत्तमः नारी च हंति नियतं पुराणविघ्नं करोति सः ॥
ज्ञातश्च जन्मालिप्सायां यदि लग्ने भवेत्क्वचित् ॥ तदा स्वजो महारोगी चक्षुनाशोऽकालदः अन्यग
हे यदा जातो धनवान्बहुसंपदः ॥ नानासुखश्च गुणवान्दिव्यभार्यो बहुपुत्रकः ॥ कोतके च यदा जा

होरार० तोसर्वगुणसमन्वितः॥जातोधर्म्मेनधनवान् पित्तशालीभवेन्नरः॥धिस्तपपंचमेस्थानेसप्तमेदृश
॥८३॥ पेंतथा॥जातोदुःखंभवेत्तस्यपुत्रदारविवर्जितः॥यदिदैवाद्भवेत्पुत्रोस्त्यगर्हीवावदातेन॥नरास्सर्वश
नंजातंजायतेन्नोत्रसंशयः॥निम्नस्थावापियोजातःसोदुःखर्त्तजान्वितः॥स्वस्थानेस्थीयतेनित्ये
परसेवासुतत्परः॥जातस्थानेस्थितःसोऽपिधनपुत्रविवर्जितः॥सुतस्थानेपिजायायांशनिनि
दायिधुंतुदः॥नरास्सर्वगुणोर्युक्तःसुताजायासमान्वितः॥ररासर्वगुणोर्युक्तःसुताजायांसमान्वितः॥न
वमेदशमेवापियदिनिम्नंभवेत्पुनः॥तदाराहुर्योदोषहकृत्सोत्रमतिर्यदिनो॥इतिराहुभावफलं॥अथा
धमहाराहुदृष्टिचक्रंभावदृष्टिचक्रंचलेख्यम्॥दृष्टिफलानिसत्याचार्यमतेजातोचसानावस्थास्था॥स
र्वस्यसर्वकालेदृग्ग्रहदृष्टिसमुद्भवंफलंयस्मात्॥कृपयाम्नातःअपत्तान्सत्याचार्येसमाश्रित्य॥१॥दा
ननतोवद्भुमत्योलालितोप्रवर्तिभवति प्राप्तोमृदुशरीरः॥कुजभगनगतेसूर्येचंद्रेरानिरीक्षितोभव
ति २॥सम्रात्मोल्कदिवीर्यत्रहनःस्वर[illegible]तनेत्रकेनवरराः॥भौमगृहकुजदृष्टेभानौ[redacted]ष्टकुन ॥८३॥
भवने पतोवलोपनः॥३॥यस्यपरकर्म्मकरोमंदलोचनःसत्वहीनवरःपञ्च भौवुधसंदृष्टेकुजभव

नेजायतेश्रेष्ठः॥ ७॥ कुत्सितरामाभर्त्तावहुशत्रुःक्षीणंबांधवोदीनः॥ भोमगृहेक्षिससकरोनवितनयेनिशेसितमूर्दवः॥ इ
तिकुगृहदृष्टिः॥ वेश्यारतिमृदुवचावहुयुवतिसमाश्रयोवभवति॥ सितभवनेस्थित्तर्प्यदृष्टेशशिनासलिलजी
वी॥ १॥ तेजस्विसहस्रवान्स्वविक्रमप्राप्तिधनकीर्त्ति दिननाथेसितभवनेकुजसंदृष्टेपुमान्मलिनः॥ लिप
लेख्यकाव्यपुस्तकग्रेहंपत्रादिविदधातिनिपुणमतिः॥ दिननाथेभृगुराशौवुधसंदृष्टेभवेन्नुतनुः॥ ३॥
नृपतिनृपमंत्रीवाष्ट्रीधनभोगसमेतोमतिमान्॥ क्षितिनाथेसितभवनेगुरुसंदृष्टेभवेन्नीरुः॥ ४॥ नी
चोलसोदरीश्रीवद्धस्त्रीसंवृत्ताविषमशीलः॥ दिननाथेसनिदृष्टेसितभवनेव्याधिसंतप्तः॥ ५॥ इति
रवेःसितभवनदृष्टिः॥ निजवांधवकृतपीडोविदेशगमनोनार्दितोवहुविलासीवहुभवनेदिनभर्त्तरिरविदृष्टेचंद्रे
णापुत्रपःस्यात॥ निजभयकलहसमंतःपरापवादेनचुंवितोवांधवःसहितोऽनामित्रसंत्यक्तः वुधोरिदिन
भर्त्तरिवुधेनदृष्टेभवेज्जातः॥ २॥ वहुशास्त्रधारितमुखोराजंदत्तोविदेशगःसुतनुः॥ वुधराशौदिनभर्त्तरि
दृष्टेगुरुणामहोन्मादः॥ ४॥ धनदारपुत्रसुखितोमंदसेहत्त्वनामयीसुभगः॥ वुधभवनेदिवसकरेशुक्रे
णनिरीक्षितेभवेच्चपलः॥ ५॥ वहुवत्योऽप्रियमनावंधुवियोगेसदादीनः वुधवेश्मनिदिनभर्त्तरि

कुजेक्षिते भवति सव्रीडः ।।३।। पापचरितः ख्यातो बांधवैः सहितोऽनमित्रसंयुक्तः । बुधो हि दिनभर्त्तरि बुधेन दृष्टे भवेत्तजातः
२ बहुशास्त्रपारितमुख्यो राजदूतो विदेशगमनतनुः । बुधराशौ दिनभर्त्तरि दृष्टे गुरुणा महोन्मादः ।।४।। धनदारपुत्रसु
खितो मंदृष्टे हृष्टनामयो च्छुभगः । बुधभवने दिवसकेन्द्रे शुक्रेणानिरीक्षिते सुपलः ।।५।। वृद्धभत्तो दिन्मनावे
धुविपोगैः सहाच्छिन्नः बुधवेश्मनि भर्त्तरि सौरेणावलोकितः ।।६।। इति बुधगृहदृष्टिः ।। राजा राजसमो वा जलपराय
धनस्थितः क्रूरः ।। कर्कटके तेजके हृष्टिर्याशिना भवेत्पुरुषः ।।१।। आर्शो मगंधरा ... संजन्नो वंधुभिः सनिरुद्धः ।। क
र्कटके दिननाथे भौमेन निरीक्षिते न विलुनः ।।२।। विद्यामानपरोभिरव्यातो नपवल्लभो भवेत्त्रिपुनः ।। सूर्ये कु
लीरे जाते बुधेन दृष्टे पुमां विकलः ।।३।। श्रेष्ठो राजामंत्री सेनानाथोऽपस्मुश्रासिद्धश्च ।। सूर्ये शशिभवन
स्थे गुरुणा दृष्टे कलाभ्यधिकः ।।४।। स्त्रीसेवी विविधजनः परकार्यकरो रणोग्रचंडश्च कर्कटसंस्थे सूर्ये भृगु
क्रेणानिरीक्षिते प्रियालापः ।।५।। कफमारुतारोगार्तः परस्वभागी विलोमरतिचेष्टः ।। कर्कटसंस्थे भानौ स्व
पुत्रदृष्टे पुमान्स विकलः ।।६।। इति कर्कटके दृष्टिः ।। मेधावी सुबलः कफार्दितो नृपवल्लभो मनुजः ।। आदि
त्ये सिंहस्थे चंद्रेणानिरीक्षिते भवति ।।१ परदाररतश्चौरो धृष्टः साहसकृत्तो घमो रौड्सिंहस्थे दिवसकरे ।।८३।।

स्याज्जनयंति मर्त्यं कर्माश्रिताः पूर्णमयं प्रसूतिं ॥ प्रभूतमित्रं जनमानपुष्टं सतां मनीषं विनयप्रधानम् ॥ २३ ॥ सू
र्यात्मजा जनयंति मर्त्यं कर्माश्रिताः सत्यपरो निधानं ॥ भूपालनानार्जितभूरिवित्तं सौभाग्यनित्यासहितं स
देव ॥ २४ ॥ सूर्यारसौरा जनयंति मर्त्यं कर्माश्रिता कर्मविवर्जितांगं व्यपेतमन्युं प्रतमानभीवं सुपक्षधर्मान्ज
नतस्मरं ता ॥ २५ ॥ सूर्येंदुपुत्रा जनयंति मर्त्यं कर्माश्रिताः क्षोणिपतेः सुरूपं ॥ दिग्घगोष्ठीपुरतं सुनीतं विद्यापरं
प्राज्ञगणसंमतं च ॥ २६ ॥ सूर्येज्यसौरा जनयंति मर्त्यं कर्माश्रिता समेतं बहुयज्ञकृत्तं ॥ सम्मान्यवित्तं सत्पदपालमेतं सु
भूरिवित्तं बहुकृत्यदक्षं समान्वितं सत्पदपासमेतं ॥ २७ ॥ सूर्यामरेज्यार्कसुता मनुष्यं कर्माश्रितास्सं जनयंति म
र्त्यं प्रशस्तवाक्यं विनयप्रधानं महाधनं देवगुरुप्रभक्तं ॥ २८ ॥ सूर्यासुरेज्यार्कसुता मनुष्यं कर्माश्रिताः की
र्तिभ्रसंकृतहं । विद्याविवेकगुणमशास्त्रलब्धं मिलितमुत्साहिनमप्रमत्तम् ॥ २९ ॥ चंद्रारसौम्याभरयंति
मर्त्यं कर्माश्रिताः कर्मविहीनचेष्टं ॥ विरोधमत्सारवरं सनत्वं धर्मप्रधानं जनसंमतं च ॥ ३० ॥ चंद्रारजीवा
जनयंति मर्त्यं कर्माश्रिताः सत्यधनं मनोज्ञम् ॥ नरेंद्रपूज्यं प्रतापं प्रगल्भं सुदानशीलं सुतदारनाम ३१
चंद्रारशुक्रा जनयंति मर्त्यं कर्माश्रितास्त्रीपरपुष्पयानुरक्तं सौभाग्यभाजं विजितारिसंघं देवद्विजानामतिव
त्सलं च ॥ ३२ ॥ चंद्रारसौरा जनयंति मर्त्यं कर्माश्रिताः कीर्तियुतं कथाज्ञम् । प्रभूततेजा नरदेवपूज्यं परोपक
रं प्रचुरं सदेव ॥ ३३ ॥ चंद्राज्ञौ जनयंति मर्त्यं कर्माश्रिताः स्थान नरेंद्रपूज्यं स्थिरस्वभावं विभवेन युक्तं सुतालब्धेनो

होरासा.
८४

तिवित्तगांचा॥२४॥ चंद्रज्ञगुरुत्रा जनयंतिमर्त्यं कर्माश्रिताः शास्त्ररतं समेतं दयाधिकं साहसकर्मविहीनं नितांतं
गुरुसाहितनभोजनमाद्यं॥२५॥ चंद्रज्ञसौरा जनयंतिमर्त्यं कर्माश्रिताः स्वल्पधनं निरीहं॥ सुसमन्तं वाक्पवि
धिप्रगल्भं स्थिरस्वभावं विरलं समानं॥२६॥ चंद्रामरेज्या भृगुजाश्च मर्त्यं कुर्वंति विद्याविनयेन युक्तं॥ कर्माश्रिताः
साधुसमागमेभ्यो लब्धनीतिभाजं नृपपूजितं च॥२७॥ सोमज्ञजीवा जनयंतिमर्त्यं कर्माश्रिताः सत्यरतं विनीतं॥
उदाराधिकं कर्माधिकं जल्पनं संयुक्तं कुलप्रधानं नयनाभिरामं॥२८॥ सोमज्ञभृग्वा जनयंतिमर्त्यं कर्माश्रिताः की
र्तिकराः सभाजनम्॥ त्रपान्वितं ज्ञानं प्रमदाभिरामं कुलप्रधानं सततं सुशीलं॥२९॥ सोमापरेज्या भृगुजा मनुष्यं
कर्माश्रिताः संजनयंति मर्त्यं॥ सदा प्रगल्भं प्रभुता सुतापं हितं गुणैः सम्पन्नं प्रधानं॥३०॥ सोमामरेज्यार्कसु
ता मनुष्यं कर्माश्रिताः संजनयंति मर्त्यं॥ सरोगं कर्माप्तं समृद्धिसार्थं परार्थभाजं नयकोविदं च॥३१॥ सोमा
सुरेज्यार्कसुता मनुष्यं कर्माश्रिताः संजनयंति नीचम्॥ अव्ययकर्मा ... तमस्वं कुलप्रधानं॥
३२॥ सोमास्फुजिद्भृगुजा मनुष्यं कर्माश्रिताः संजनयंति मर्त्यं॥ धीरं ... संतानैरतं ... जितबां
धवानां॥३३॥ सोमास्फुजिच्छनैश्चरार्कसुता मनुष्यं कर्माश्रिताः संजनयंति नित्यं॥ उद्यानवापीनिरतं सुधर्मं ... जि
ताः ... प्रभावं॥३४॥ जीवासुरेज्यार्कसुता मनुष्यं कर्माश्रिताः संजनयंति मर्त्यं निसर्गसुहृत्सु मति
प्रालंबं ... विवर्जितं च॥३५॥ एवं त्रिविकल्पाः ... मनुष्यं कर्माश्रितास्त ८५
गं॥

जनयंति मर्त्यं विद्यानिधानं बहुवित्तभाजं सुतप्रधानं परिवर्जितं च ॥ ४६ ॥ रवींदुभौमामरपूजितांगाः क
र्म्माश्रितास्ते जनयंति मर्त्यम् ॥ प्रभूतमत्स्यं प्रमदासमेतं सतामभीष्टं नृपवल्लभं च ॥ ४७ ॥ नवींदुभौमा
मरपूजितांगाः कर्म्माश्रितास्ते जनयंति मर्त्यम् ॥ हयेभसमेतं बहुबुद्धिभाजं व्यपेतमन्युं द्विजदेवभक्तं
॥ ४८ ॥ नवींदुभौमार्कसुतामनुष्यकर्माश्रिताः संजनयंति मर्त्यम् ॥ नानार्थशास्त्रैः सहितं कृतज्ञं प्रभूत
वस्त्राभरणं सुशीलम् ॥ ४९ ॥ नवींदुभौमामरपूजितांगाः कर्माश्रिताः संजनयंति मर्त्यम् विदग्धवाक्यं
कृतज्ञनिश्चयं च प्रहीनपापं सुतरं प्रगल्भम् ॥ ५० ॥ नवींदुसौम्यामरपूजितांगाः कर्माश्रितास्तं जन
यंति मर्त्यम् ॥ कृतज्ञमुत्साहिनं प्रियभोगं प्रसंशितं साधुजनेन नित्यम् ॥ ५१ ॥ नवींदुजीवासुरपू
जितांगाः कर्माश्रितास्तं जनयंति मर्त्यम् ॥ गुणप्रधानं प्रथितप्रभावं मेधाविनं धर्मसमन्वितं
च ॥ ५२ ॥ नवींदुजीवार्कसुतामनुष्यकर्माश्रिताः संजनयंति मर्त्यं ॥ प्रभूतमित्रं प्रभुतं सौख्ययुक्तं
महाप्रसादं सुसमाधितं च ॥ ५३ ॥ नवींदुशुक्रार्कसुतामनुष्यकर्माश्रिताः संजनयंति मर्त्यं ॥ तेज
स्विनं शौचपरं प्रधानं सद्योद्यमं मानिनि पुत्रमं च ॥ ५४ ॥ सूर्यारसौम्यामरपूजितांगाः कर्माश्रिता
स्संजनयंति मर्त्यम् ॥ सत्वान्वितं विप्रप्रियं निरीहं यशोन्वितं तीर्थरतं सुताढ्यम् ॥ ५५ ॥ सूर्यारसौम्या

